# .. sAvitryupaniShad ..

# ॥ સાવિત્ર્યુપનિષત્ ॥

## Document Information

Text title : sAvitryupaniShat

File name : savitri_u.itx

Category : upaniShat

Location : doc_upanishhat

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Anshuman Pandey , Vijay Pai

Latest update : December 31, 1996, July 20, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ સાવિત્ર્યુપનિષત્ ॥

સાવિત્ર્યુપનિષદ્વેદ્યચિત્સાવિત્રપદોજ્જ્વલમ્ ।
પ્રતિયોગિવિનિર્મુક્તં રામચન્દ્રપદં ભજે ॥

સાવિત્ર્યાત્મા પાશુપતં પરં બ્રહ્માવધૂતકમ્ ।
ત્રિપુરાતપનં દેવીત્રિપુરા કઠભાવના ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ । સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેઽસ્તુ । તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥

કઃ સવિતા કા સાવિત્રી અગ્નિરેવ સવિતા પૃથિવી સાવિત્રી સ યત્રાગ્નિસ્તત્પૃથિવી યત્ર વૈ પૃથિવી તત્રાગ્નિસ્તે દ્વે યોની તદેકં મિથુનમ્ ॥ ૧॥

કઃ સવિતા કા સવિત્રી વરુણ એવ સવિતાપઃ સાવિત્રી સ યત્ર વરુણસ્તદાપો યત્ર વા આપસ્તદ્વરુણસ્તે દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૨॥

કઃ સવિતા કા સાવિત્રી વાયુરેવ સવિતાકાશઃ સાવિત્રી સ યત્ર વાયુસ્તદાકાશો યત્ર વા આકાશસ્તદ્વાયુસ્તે દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૩ ॥

કઃ સવિતા કા સાવિત્રી યજ્ઞ એવ સવિતા છન્દાંસિ સાવિત્રી સ યત્ર યજ્ઞસ્તત્ર છન્દાંસિ યત્ર વા છન્દાંસિ સ યજ્ઞસ્તે દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૪॥

કઃ સવિતા કા સાવિત્રી સ્તનયિત્નુરેવ સવિતા વિદ્યુત્સાવિત્રી સ યત્ર સ્તનયિત્નુસ્તદ્વિદ્યુત્ યત્ર વા વિદ્યુત્તત્ર સ્તનયિત્નુસ્તે દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૫॥

કઃ સવિતા કા સાવિત્રી આદિત્ય એવ સવિતા દ્યૌઃ સાવિત્રી સ યત્રાદિત્યસ્તદ્દ્યૌર્યત્ર વા દ્યૌસ્તદાદિત્યસ્તે દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૬॥

કઃ સવિતા કા સાવિત્રી ચન્દ્ર એવ સવિતા નક્ષત્રાણિ સાવિત્રી
સ યત્ર ચન્દ્રસ્તન્નક્ષત્રાણિ યત્ર વા નક્ષત્રાણે સ ચન્દ્રમાસ્તે
દ્વે યોનિસ્તદેકં મિથુનમ્ ॥ ૭॥

કઃ સવિતા કા સાવિત્રી મન એવ સવિતા વાક્ સાવિત્રી સ યત્ર વા
મનસ્તદ્વાક્ યત્ર વા વાક્ તન્મનસ્તે દ્વે યોનિસ્તદેકં
મિથુનમ્ ॥ ૮॥

કઃ સવિતા કા સાવિત્રી પુરુષ એવ સવિતા સ્ત્રી સાવિત્રી સ યત્ર
પુરુષસ્તત્સ્ત્રી યત્ર વા સ્ત્રી સ પુરુષસ્તે દ્વે યોનિસ્તદેકં
મિથુનમ્ ॥ ૯॥

સાવિત્ર્યાઃ પાદત્રયમ્
તસ્યા એવ (એષ) પ્રથમઃ પાદો ભૂસ્તત્સવિતુર્વરેણ્યમિત્યગ્નિર્વૈ
વરેણ્યમાપો વરેણ્યં ચન્દ્રમા વરેણ્યમ્ ॥ ૧૦॥

તસ્યા એવ (એષ) દ્વિતીયઃ
પાદો ભર્ગમયોઽપિ ભુવો ભર્ગો દેવસ્ય ધીમહીત્યગ્નિર્વૈ ભર્ગ
આદિત્યો વૈ ભર્ગશ્ચન્દ્રમા વૈ ભર્ગઃ ॥ ૧૧॥

તસ્યા એષ તૃતીયઃ પાદઃ સ્વર્ધિયો યો નઃ પ્રચોદયાદિતિ
સ્ત્રી ચૈવ પુરુષશ્ચ પ્રજનયતઃ ॥ ૧૨॥

સાવિત્રીવેદનફલં પુનર્મૃત્યુઞ્જયઃ
યો વા એતાં સાવિત્રીમેવં વેદ સ પુનર્મૃત્યું જયતિ ॥ ૧૩॥

બલાતિબલયોર્વિરાટ્ પુરુષ ઋષિઃ । ગાયત્રી છન્દઃ ।
ગાયત્રી દેવતા । અકારોકારમકારા બીજાદ્યાઃ ।
ક્ષુધાઽઽદિનિરસને વિનિયોગઃ । ક્લામિત્યાદિષડઙ્ગમ્ (ષડઙ્ગન્યાસઃ) ।
ધ્યાનમ્ ।
અમૃતકરતલાગ્રૌ (તલાર્દ્રૌ) સર્વસંજીવનાઢ્યા-
વઘહરણસુદક્ષૌ વેદસારે મયૂખે ।
પ્રણવમયવિકારૌ ભાસ્કરાકારદેહૌ
સતતમનૂભવેઽહં તૌ બલાતિબલાન્તૌ ॥ var બલાતી

ૐ હ્રીં બલે મહાદેવિ હ્રીં મહાબલે ક્લીં
ચતુર્વિધપુરુષાર્થસિદ્ધિપ્રદે તત્સવિતુર્વરદાત્મિકે
હ્રીં વરેણ્યં ભર્ગો દેવસ્ય વરદાત્મિકે અતિબલે સર્વદયામૂર્તે
બલે સર્વક્ષુચ્છ્રમોપનાશિનિ ધીમહિ ધિયો યો નર્જાતે પ્રચુર્યા
(var બલે સર્વક્ષુદ્ભ્રમોપનાશિનિ ધીમહિ ધિયો યો નર્જાતે પ્રચુર્યઃ)

યા પ્રચોદયાદાત્મિકે પ્રણવશિરસ્કાત્મિકે હું ફટ્ સ્વાહા ॥ ૧૪॥

વિદ્યાફલમ્
એવં વિદ્વાન્ કૃતકૃત્યો ભવતિ સાવિત્ર્યા એવ સલોકતાં
જયતીત્યુપનિષત્ ॥ ૧૫॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ । સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં બ્રહ્મ
નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં
મેઽસ્તુ । તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ
સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ તત્સત્ ॥

ઇતિ સાવિત્ર્યુપનિષત્સમાપ્તા ॥

Encoded and proofread by Anshuman Pandey pandey at umich.edu
Proofread by DPD

.. sAvitryupaniShad ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*